ॐ

# *ANUBHŪTIPRAKĀŚA*
# CHAPTER - I
## *AITAREYOPANIṢADVIVARAṆAM*

ऐतरेयेण सम्प्रोक्ता द्वितीयारण्यकान्तगा ।
ब्रह्मविद्या सुविस्पष्टं बालबोधाय तन्यते ॥१॥

आत्मैव सृष्टेः प्रागासीन्नामरूपविवर्जितः ।
सोऽप्येक एव नान्योऽस्ति जडं चान्यन्न विद्यते ॥२॥

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
इति श्रुत्यन्तरे प्रोक्ता माया नास्त्यत्र तत्त्वतः ॥३॥

निस्तत्त्वं व्यवहारार्हम नृतं बालयक्षवत् ।
बालो यक्षं प्रकल्प्यास्माद् बिभेति व्याघ्रतो यथा ॥४॥

निस्तत्त्वापि जगद्भ्रान्तिं माया निद्रेव कल्पयेत् ।
वस्तुतत्त्वं जडं किंचिन्नान्यदस्त्यात्मवस्तुनः ॥५॥

अद्वयानन्दरूपात्मा तदा सुप्ताविव स्थितः ।
निर्विकारोप्यसावात्मा मायावृत्त्या व्यचारयत् ॥६॥

स विचार्याखिलान्लोकान् सृष्ट्वा पालक सृष्टये ।
कृत्वा विराट् तनुं छिद्रेष्वथ तद्देवता व्यधात् ॥७॥

समुद्रतुल्ये देहेस्मिन्देवताः पतितास्तथा ।
तं देहं क्षुत्पिपासाभ्यां योजयामास स प्रभुः ॥८॥

अन्नभोगायात्मदेहान् गवाश्वपुरुषादिकान् ।
सृष्ट्वा प्रावेशयत् तत्र देवतास्ता यथायथम् ॥९॥

ईशोऽसाधारणं स्थानमपश्यन् क्षुत्पिपासयोः ।
प्रावेशयद्देवतासु तद्भोगात् ते च तृप्यतः ॥१०॥

अन्ने सृष्टे भोक्तृवर्गो ह्यजिघृक्षत् तदिन्द्रियैः ।
तत्र वागादयोऽशक्तास्तदपानो गृहीतवान् ॥११॥

जीवाभावे वृथा सर्वमित्यालोच्य परेश्वरः ।
शिरोमध्यं विदार्यात्र प्राविशज्जीवरूपतः ॥१२॥

प्राणानां धारकः कर्ता चेतनो जीव उच्यते ।
आनखाग्रमहङ्कारश्चिद्व्याप्तश्चेतनोऽभवत् ॥१३॥

अन्तःकरणभागौ द्वावहङ्कारो मनस्तथा ।

वृक्षस्य मूलमग्रं च यथाभागौ तथेक्ष्यताम् ॥१४॥

चिद्बिम्बप्रतिबिम्बाभ्यां युक्तोऽहङ्कार एव तु ।
चेतनः प्राणभृत् तस्य हृन्निष्ठं करणं मनः ॥१५॥

तस्य हृत्कण्ठनेत्रेषु प्रचारवशतोऽभवत् ।
सुप्तिः स्वप्नो जागरश्च सोऽयं संसार ईरितः ॥१६॥

स्वप्नः स्वकाल एवास्ति नान्यदा सुप्तिजागरौ ।
तथैवेति स्वप्नसाम्यात् त्रयः स्वप्ना उदीरिताः ॥१७॥

अध्यारोपो मायिकोऽयम् उक्तोऽथासावपोह्यते ।
अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते ॥१८॥

स संसारीश्वरो जात ईश्वरानुग्रहात् पुनः ।
पृथिव्यादीनि भूतानि यथाशास्त्रं व्यचारयत् ॥१९॥

परमात्मन उत्पन्नं जगदात्मैव नेतरत्।
मृदो जातो घटो यद्वत् मृद्वस्त्वेव तथेक्ष्यताम् ॥२०॥

घटः शराव इत्यादि विकाराणां मृदः पृथक् ।
तत्त्वं नास्ति प्रतीते तु नामरूपे प्रकल्पिते ॥२१॥

प्रतिबिम्बभ्रमो नीराद्युपाधिवशतो यथा ।
सन्निवेशोपाधितोऽयं तथा कुम्भादिविभ्रमः ॥२२॥

भ्रान्तिः सोपाधिकोपाधिनिवृत्त्यैव निवर्तते ।
न बोधात् तेन भासन्ते जानतोऽपि घटादयः ॥२३॥

पृथग् द्रव्यस्वरूपः सन् समवेतो घटो मृदि ।
इत्याहुस्तार्किकास्तत्तु न द्वैगुण्यप्रसङ्गतः ॥२४॥

मृद्भारात् घटभाराच्च गुरुत्वं द्विगुणं भवेत् ।
तथालङ्कारकर्ता स्यात् कृती हेमादिवृद्धितः ॥२५॥

न सन्निवेशमात्रेण पृथग्द्रव्यत्वसम्भवः ।
शयनोत्थानगमनैः न पुत्रे बहुपुत्रता ॥२६॥

तस्मात् कार्यं न वस्तु स्यात् कारणव्यतिरेकतः ।
किन्तु कारण एवैतदनृतं भासते मृषा ॥२७॥

अर्थक्रियानृतेऽप्यस्ति स्थाणौ चोरभयेक्षणात् ।
ततोऽनृता घटाद्याः स्युर्भान्तु कुर्वन्तु वा क्रियाम् ॥२८॥

सन्निवेशोपाधिहाने गच्छत्येव घटादिधीः ।
विवेकिनां तु वस्तुत्वं घटादीनां निवर्तते ॥२९॥

घटः शराव इत्येवं वाचैवारभ्यते वृथा ।
मृत्तिकेत्येव सत्यं स्यान्न तु सत्यं घटादिकम् ॥३०॥

एवमात्मन उत्पन्नं पृथिव्याद्यपि नात्मनः ।
पृथग्वस्त्वस्ति किं त्वात्मन्यारोपात् प्रतिभासते ॥३१॥

सद्वस्तु ह्यात्मनस्तत्त्वं तस्मिन् भूम्यादिकल्पनात् ।
पृथिव्यादीनि सन्तीति भासन्ते तत्तदिन्द्रियैः ॥३२॥

इन्द्रियोपाधिका भ्रान्तिरक्षरोधान्न भासते ।
इत्येतद् विशदीकर्तुं योगो वेदेषु वर्ण्यते ॥३३॥

सदात्मनः पृथग्भूतमसद्भूम्यादि तेन तत् ।
भात्वक्षैः कार्यकृद् वाऽस्तु मिथ्यैव स्याद् घटादिवत् ॥३४॥
ईदृग्विवेकदृष्ट्येदं जगदात्मैव नेतरत् ।
एवं सत्यात्मनोऽन्यत् किं वस्तुतोऽस्तीति शङ्क्यते॥३५॥

अद्वयानन्दरूपात्मा सृष्टेः पूर्वमभूद्यथा ।
तथैवाद्यापि सम्पन्नो बुद्ध्या सम्यग् विवेचितः॥३६॥

इत्थं सर्वात्मकं ब्रह्म विविच्य पुनरप्यसौ ।
एतमेव स्वमात्मानं ब्रह्मत्वेन व्यलोकयत् ॥३७॥

अहङ्कारश्च चिच्छाया मिथ्या भूम्यादिवत् ततः ।
चिदात्मैकोऽवशिष्टोऽयं जीवो ब्रह्मैव नेतरः ॥३८॥

यथाशास्त्रं विविच्येत्थं प्रत्यग्दृष्ट्या चिदात्मनः ।
साक्षाच्चकार ब्रह्मत्वं जीवः शान्त्यादिसंयुतः ॥३९॥

इदमित्यपरोक्षेण ददर्शेति विवक्षया ।
इदन्द्रनामाभूज्ज्ञानी वैयाकरणदृष्टितः ॥४०॥

तमिन्द्र इत्याहुरन्ये नाम्नः पारोक्ष्यसिध्दये ।
पूज्यस्य देवपित्रादेः परोक्षं नाम हि प्रियम् ॥४१॥

परमेश्वररूपत्वादपीन्द्रत्वमिहोचितम् ।
समाप्ता ब्रह्मविद्येयमुत्तमस्याधिकारिणः ॥४२॥

विरक्तस्योक्तबोधः स्याद् वैराग्यं दोषदर्शनात् ।
जन्मैव प्रथमो दोषस्तद्बीभत्सा निरूप्यते ॥४३॥

स्वर्गाद्वा नरकाद्वायं वृष्टिद्वारान्नसंस्थितः ।
प्रविश्य पितरं तत्र गर्भो भवति रेतसि ॥४४॥

तद्रेतः पितृदेहस्थं सर्वाङ्गेभ्यः समुत्थितं ।
पितुः स्वदेहो गर्भाख्यदेहश्चेति वपुर्द्वयम् ॥४५॥

स्त्रियां सिञ्चति तद्रेतस्तत्पुत्रोत्पादनं पितुः ।
पुत्ररूपेण तज्जन्म पितुराद्यं स्वयं कृतम् ॥४६॥

योषिद्योनिं प्रविश्यायं योषिद्गर्भे स्फुटीभवेत् ।

योषिद्वीर्येण पुष्टोऽसौ तद्देहेनैकतां व्रजेत् ॥४७॥

अन्यथैनां स्त्रियं हन्याद् गुल्मव्याधिवदान्तरः ।
स्वाङ्गवन्न हिनस्त्येनां गर्भं रक्षति सा ततः ॥४८॥

गर्भरूपं भर्तृदेहं यतः सा पालयत्यतः ।
सापि भर्त्रा पालनीया तदिष्टान्नादिवस्तुभिः ॥४९॥

गर्भो विण्मूत्रयोः स्थित्वा दशमे मासि जायते ।
पिता स्वात्मधिया पुत्रं संस्कारोति यथाविधि ॥५०॥

पितुर्द्वितीयं तज्जन्म पुत्ररूपेण संस्थितम् ।
स्वोदरात् दारजठरादपि जन्मद्वयं क्रमात् ॥५१॥

पतिर्जायां विशत्यादौ गर्भो भूत्वा स्वमातरम् ।
जायैव माता सम्पन्नेत्यहो संसारकष्टता ॥५२॥

लौकिकं वैदिकं सर्वं पुत्रेऽवस्थाप्य तत्पिता ।
मृतो देहान्तरे पित्रोरन्ययोर्विशति स्वयम् ॥५३॥

पुत्ररूपेण यज्जन्मद्वयं पूर्वमुदीरितम् ।
तदपेक्षं तृतीयं तज्जन्म स्याद् देहधारिणः ॥५४॥

स्वोदरं दारजठरं तथा पित्रन्तरोदरम् ।
त्रय आवसथा इत्थं जन्तोः सर्वस्य जन्मने ॥५५॥

जन्मानि योनिलक्षाणां जन्तुश्चतुरशीतिषु ।
उत्तमाधमरूपाणि प्राप्नोत्येवं पुनः पुनः ॥५६॥

दुष्टत्वं जन्मनः प्रोक्तं स्पष्टा रोगादि दुष्टता ।
विरक्तो बुद्धतत्त्वस्तु मुच्यते वामदेववत् ॥५७॥

पूर्वजन्मनि बोधेन स्वमुक्तिं चाब्रवीदृचा।
गर्भस्थो वामदेवोऽयं प्रतिबन्धविवर्जितः ॥५८॥

जन्मन्यतीते वेदान्तं श्रुत्वाप्येष न बुद्धवान् ।
बलिना प्रतिबद्धत्वात् कर्मणा जन्महेतुना ॥५९॥

गर्भे प्रविश्य तत्कर्म विनष्टं प्रतिबन्धकम्।
नवमे मासि संस्मृत्य श्रवणं प्रतिबुद्धवान् ॥६०॥

विद्वान् भूत्वा समुत्पन्नो जीवन्मुक्तोऽभवत् तदा ।
शरीरमात्मनो भिन्नं मिथ्यैवेत्यवगच्छति ॥६१॥

इयन्तं कालमेतस्मिन् भ्रान्त्या देहे निमग्नवान् ।
बोधेन देहादुत्क्रम्योत्कृष्टोऽभूज्जीवतां त्यजन् ॥६२॥

जीवत्वेऽपगते तस्य शिष्यते परमात्मता ।
स एव स्वर्गतुल्योऽभूदिन्द्रियाविषयत्वतः ॥६३॥

परोक्षोऽपि विमूढानां विद्वद्भिरवलोक्यते ।
सर्वेऽपि विषयानन्दाः प्राप्ता दृष्टे निजात्मनि ॥६४॥

आत्मानन्दसमुद्रस्य विप्लुषो विषयोत्थिताः।
आत्मन्यन्तर्भवन्त्यन्ते समुद्रे बिन्दवो यथा ॥६५॥

आत्मन्यानन्दमज्ञात्वा विषये सुखविभ्रमात् ।
भोक्तुमिच्छति तल्लाभाद् धीरात्मन्युपशाम्यति ॥६६॥

आत्मानन्दं क्षणं भुक्त्वा पुनर्भ्रान्त्या बहिर्व्रजेत् ।
विवेकिधीर्निजानन्दं भुङ्क्ते तत्स्थैव सर्वदा ॥६७॥

विषये दुःखजातं यत्तद्वीक्ष्यापक्षपाततः ।
शक्यो बोद्धुं निजानन्दो बुध्यन्ते हि विवेकिनः॥६८॥

वामदेवोऽखिलानन्दानाप्यात्मन्यमृतोऽभवत् ।
देहप्राणवियोगाख्या मृतिश्चिद्वस्तुनो न हि ॥६९॥

इत्थं संसारदुष्टत्वं पुरुषार्थं च बोधतः ।
श्रुत्वा विरक्ता बोधार्थं मीमांसन्ते मुमुक्षवः ॥७०॥

अहं पश्याम्यहं वच्मीत्यात्मानं सर्वदा वयम् ।
उपास्महे योगिवद्यं कोऽसौ मूर्ध्नि प्रविष्टवान् ॥७१॥

मायावी शुद्धचिद्वात्मा कतरः सृष्टितः पुरा ।
बुभुत्सन्ते द्वयोस्तत्त्वं जीवात्मपरमात्मनोः ॥७२॥

जीवस्य चेतनत्वेन चैतन्यं चिन्त्यतामिदम् ।
चक्षुरादिविशिष्टं तच्छुद्धं वा तत्त्वमस्य किम् ॥७३॥

चक्षुःश्रोत्रे घ्राणजिह्वे त्वक् च धीन्द्रियपञ्चकम् ।
रूपशब्दौ गन्धरसौ स्पर्शश्चविषयाः क्रमात् ॥७४॥

वाक्पाणिपादपायूपस्थाः कर्मेन्द्रियपञ्चकम् ।
भाषणादानगमनविसर्गानन्दकाः क्रियाः ॥७५॥

गोलकानि दशैतेषामक्ष्यादीनि स्फुटानि हि ।
ज्ञानक्रियाशक्तिरूपमिन्द्रियं गोलकस्थितम् ॥७६॥

प्राणोऽपानस्समानश्चोदानव्यानौ च वायवः ।
हृद्गुदे नाभिकण्ठौ च देहश्चैषु वसन्ति ते ॥७७॥

श्वासाधोगतिवृत्ती द्वे वपुष्यन्नसमीकृतिः ।
उद्गारादिर्देहबलं पञ्च वायुक्रिया इमाः ॥७८॥

अहंकर्ता वपुर्व्याप्य जडं चेतनतां नयेत् ।
मनोऽन्तर्हृद्यवस्थाय वृत्तीः कामादिकाः सृजेत् ॥७९॥

ज्ञानेन्द्रियाणि पञ्चात्र तथा कर्मेन्द्रियाण्यपि ।

वायवः पञ्च कर्ता च मनः सप्तदशं स्मृतम् ॥८०॥

सोऽयं सप्तदशस्तोमो लिङ्गदेहः स्वयोनिषु ।
सर्वासु संसरत्यस्य विनाशो मोक्ष उच्यते ॥८१॥

अज्ञानकल्पितो देहस्तत्त्वज्ञानेन नश्यति ।
ज्ञानोत्पत्तिर्विचारेण तस्मादात्मा विचार्यते ॥८२॥

येन पश्यत्यसावात्मा यः पश्यति स वा भवेत् ।
द्रष्टा पश्यति बोधेन चाक्षुषेण तयोस्तु कः ॥८३॥

शृणोति येन यः श्रोता तयोरित्यादि योज्यताम् ।
चैतन्यमस्ति करणे कर्तरीत्यत्र चिन्त्यते ॥८४॥

बहूनि करणान्येषु बोधा दृष्ट्यादिनामकाः ।
बहवः कर्तृबाहुल्यमपि द्रष्ट्रादिभेदतः ॥८५॥

करणानां च कर्तॄणां भेदः स्याच्चक्षुरादिके ।
बाह्ये यथा तथैवान्तः शरीरेऽप्यवगम्यताम् ॥८६॥

कर्त्रुपाधिरहङ्कारो वाच्यो हृदयशब्दतः ।
करणं स्यान्मनस्तस्य संज्ञानाद्यास्तु वृत्तयः ॥८७॥

तत्र सर्वत्र चैतन्यं लक्ष्यते हि पृथक् पृथक् ।
एवं सति बहुष्वेषु कः स्यादात्मेति संशयः ॥८८॥

प्रज्ञानमेकं सर्वेषु यत्स आत्मेति निर्णयः ।
प्रकृष्टं निरुपाधित्वात् चैतन्यं यत्तदीक्ष्यताम् ॥८९॥

अहङ्कारो मनोबाह्यं करणं चाप्युपाधयः।
तेषु सर्वेषु चिच्छाया संक्रान्ता चेतनास्ततः ॥९०॥

न मुख्यं तेषु चैतन्यमात्मत्वस्याप्यमुख्यता ।
सुषुप्तौ तानि लुप्यन्ते न त्वात्मा तत्र लुप्यते ॥९१॥

प्रज्ञानं निरुपाधित्वात् नित्यं तल्लोपभासकम् ।
प्रज्ञानस्यात्मता तस्मान्मुख्या नान्यस्य कस्यचित् ॥९२॥

द्रष्ट्राद्या अपि दृष्ट्याद्याः शब्दा मुख्यात्मवस्तुनः ।
नामान्युपाधिमालम्ब्य तस्मादात्मोपलक्षकाः ॥९३॥

यथैकस्यैव संबन्धविशेषोपाधिनाखिलाः ।
पुत्रभ्रात्रादयः शब्दा नामत्वेनोपलक्षकाः ॥९४॥

उपलक्ष्यं तु हस्तादि युक्तमेकं वपुस्तथा ।
चेतनैः कर्तृकरणैः प्रज्ञानमुपलक्ष्यते ॥९५॥

प्रज्ञानं कर्तृदेहादिसाक्षिभूतं यदस्ति तत् ।
जीवस्य वास्तवं रूपमित्येवं निर्णयो भवेत् ॥९६॥

प्रज्ञानं स्वशरीरेऽस्ति तथा देहान्तरेष्वपि ।
ब्रह्मादिस्थावरान्तेषु तस्य स्यात् परमात्मता ॥९७॥

प्रज्ञानस्यास्य जीवत्वं प्राणधारणतो यथा ।
जगत्सृष्ट्यादिहेतुत्वात् ब्रह्मत्वं च तथेष्यताम् ॥९८॥

स्थावरं जङ्गमं सर्वं जगदित्यभिधीयते ।
तस्य प्रज्ञैव नेत्रं स्यात् सृष्ट्यादिनयनादसौ ॥९९॥

प्रज्ञानं शुध्दचिद्रूपमासीद्यत् सृष्टितः पुरा ।
तस्मिन् प्रतिष्ठितं सर्वं माययोत्पादितत्त्वतः ॥१००॥

उत्पत्तिस्थितिकालेऽसौ लोकः प्रज्ञाननेत्रकः।
नेत्रत्वं व्यवहारस्य सुखादेर्नयनाद् भवेत् ॥१०१॥

लये प्रज्ञा प्रतिष्ठा स्यात् तत्र सर्वस्य संहृतेः ।
सृष्टिस्थितिलया इत्थं श्रुताः प्रज्ञानहेतुकाः ॥१०२॥

स्वप्नसृष्टिस्थितिलया जीवचैतन्यसाक्षिकाः ।
निर्जीवस्तंभकुड्यादौ स्वप्नसृष्ट्यादयो न हि ॥१०३॥

जगत्सृष्टिस्थितिलया ब्रह्मचैतन्यसाक्षिकाः ।
ब्रह्मचैतन्यरहिते वन्ध्यापुत्रे न सन्ति ते ॥१०४॥

जगत्सृष्ट्याद्यधिष्ठानं शुध्दचैतन्यमद्वयम् ।
परमात्मस्वरूपं स्यादिति तस्यात्र निर्णयः॥१०५॥

यत् प्रज्ञानं स्वात्मरूपं तद्ब्रह्मेति विबुध्यताम् ।
प्रज्ञानं ब्रह्म विज्ञाय तिष्ठेत् प्रज्ञात्मना सदा ॥१०६॥

जीवन्नेव स्थितप्रज्ञो मुक्तः स्याद् वामदेववत् ।
म्रियतां यत्र तत्रास्य वपुः सोऽयं न जायते ॥१०७॥

ऐतरेयब्रह्मविद्यां व्याख्यातां सङ्ग्रहादिमाम् ।
सुस्थिरामनुगृह्णातु विद्यातीर्थमहेश्वरः ॥१०८॥

इति श्रीविद्यारण्यमुनिकृते अनुभूतिप्रकाशे ऐतरेयोपनिषद्विवरणं नाम प्रथमोऽध्यायः ।

॥ ॐ ॥